# maThAmnAyamahAnushAsanam

# मठाम्नायमहानुशासनम्

## Document Information

Text title : maThAmnAyamahAnushAsanam

File name : maThAmnAyamahAnushAsanam.itx

Category : shankarAchArya

Location : doc_z_misc_shankara

Author : Adyashankaracharya

Transliterated by : Ankur Nagpal ankurnagpal108 at gmail.com

Proofread by : Ankur Nagpal ankurnagpal108 at gmail.com

Description-comments : (importance of and rules for maThas)

Latest update : March 9, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# मठाम्नायमहानुशासनम्

शारदा मठाम्नायः ।
प्रथमः पश्चिमाम्नायः शारदामठ उच्यते ।
कीटवारः सम्प्रदायस्तस्य तीर्थाश्रमौ पदे ॥ १॥

द्वारकाख्यं हि क्षेत्रं स्याद् देवः सिद्धेश्वरः स्मृतः ।
भद्रकाली तु देवी स्याद् हस्तामलक देशिकः ॥ २॥ var आचार्यो विश्वरूपकः
गोमतीतीर्थममलं ब्रह्मचारी स्वरूपकः ।
सामवेदस्य वक्ता च तत्र धर्मं समाचरेत् ॥ ३॥
जीवात्मपरमात्मैक्य बोधो यत्र भविष्यति ।
तत्त्वमसि महावाक्यं गोत्रोऽविगत उच्यते ॥ ४॥

सिन्धु-सौवीर-सौराष्ट्र-महाराष्ट्रस्तथान्तराः ।
देशाः पश्चिमदिक्स्था ये शारदामठभागिनः ॥ ५॥

त्रिवेणीसङ्गमे तीर्थे तत्त्वमस्यादिलक्षणे ।
स्नायात्तत्त्वार्थभावेन तीर्थनाम्ना स उच्यते ॥ ६॥

आश्रमग्रहणे प्रौढ आशापाशविवर्जितः ।
यातायातविनिर्मुक्त एतदाश्रमलक्षणम् ॥ ७॥

कीटादयो विशेषेण वार्यन्ते यत्र जन्तवः ।
भूतानुकम्पया नित्यं कीटवारः स उच्यते ॥ ८॥

स्व-स्वरूपं विजानाति स्वधर्म-परिपालकः ।
स्वानन्दे क्रीडते नित्यं स्वरूपो बटुरुच्यते ॥ ९॥

गोवर्धन मठाम्नायः ।
पूर्वाम्नायो द्वितीयः स्याद् गोवर्धनमठः स्मृतः ।
भोगवारः सम्प्रदायो वनारण्ये पदे स्मृते ॥ १०॥

पुरुषोत्तमं तु क्षेत्रं स्यांज्जगन्नाथोऽस्य देवता ।

विमलाख्याहि देवी स्यादाचार्यः पद्मपादकः ॥ ११॥

तीर्थं महोदधिः प्रोक्तं ब्रह्मचारी प्रकाशकः ।
महावाक्यं च तत्र स्यात् प्रज्ञानं ब्रह्म चोच्यते ॥ १२॥

ऋग्वेदपठनं चैव काश्यपो गोत्रमुच्यते ।
अङ्गबङ्गकलिङ्गाश्च मगधोत्कलबर्बराः ।
गोवर्धनमठाधीना देशाः प्राचीव्यवस्थिताः ॥ १३॥

सुरम्ये निर्जने स्थाने वने वासं करोति यः ।
आशाबन्धविनिर्मुक्तो वननामा स उच्यते ॥ १४॥

अरण्ये संस्थितो नित्यमानन्दे नन्दने वने ।
त्यक्त्वा सर्वमिदं विश्वमारण्यं परिकीर्त्यते ॥ १५॥

भोगो विषय इत्युक्तो वार्यते येन जीविनाम् ।
सम्प्रदायो यतीनाञ्च भोगवारः स उच्यते ॥ १६॥

स्वयं ज्योतिर्विजानाति योगयुक्तिविशारदः ।
तत्त्वज्ञानप्रकाशेन तेन प्रोक्तः प्रकाशकः ॥ १७॥

ज्योतिर्मठाम्नायः ।
तृतीयस्तूत्तराम्नायो ज्योतिर्नाम मठो भवेत् ।
श्रीमठश्चेति वा तस्य नामान्तरमुदीरितम् ॥ १८॥

आनन्दवारो विज्ञेयः सम्प्रदायोऽस्य सिद्धिदः ।
पदानि तस्य ख्यातानि गिरिपर्वतसागराः ॥ १९॥

बदरीकाश्रमः क्षेत्रं देवो नारायणः स्मृतः ।
पूर्णागिरि च देवी स्यादाचार्यस्तोटकः स्मृतः ॥ २०॥

तीर्थं चालकनन्दाख्यं आनन्दो ब्रह्मचार्यभूत् ।
अयमात्मा ब्रह्म चेति महावाक्यमुदाहृतम् ॥ २१॥

अथर्ववेदवक्ता च भृग्वाख्यं गोत्रमुच्यते ।
कुरुकाश्मीरकाम्बोजपांचालादिविभागतः ।
ज्योतिर्मठवशा देशा उदीचीदिगवस्थिताः ॥ २२॥

वासो गिरिवने नित्यं गीताध्ययनतत्परः ।
गंभीराचलबुद्धिश्च गिरिनामा स उच्यते ॥ २३॥

वसन् पर्वतमूलेषु प्रौढं ज्ञानं विभर्ति यः ।
सारासारं विजानाति पर्वतः परिकीर्त्यते ॥ २४॥

तत्त्वसागरगम्भीर ज्ञानरत्नपरिग्रहः ।
मर्यादां वै न लङ्घेत सागरः परिकीर्त्यते ॥ २५॥

आनन्दो हि विलासश्च वार्यते येन जीविनाम् ।
सम्प्रदायो यतीनां चानन्दवारः स उच्यते ॥ २६॥

सत्यं ज्ञानमनन्तं यो नित्यं ध्यायेत तत्त्ववित् ।
स्वानन्दे रमते चैव आनन्दः परिकीर्त्यते ॥ २७॥

शृङ्गेरी मठाम्नायः ।
चतुर्थो दक्षिणाम्नायः शृङ्गेरी तु मठो भवेत् ।
सम्प्रदायो भूरिवारो भूर्भवो गोत्रमुच्यते ॥ २८॥

पदानि त्रीणि ख्यातानि सरस्वती भारती पुरी ।
रामेश्वराह्वयं क्षेत्रमादिवाराहदेवता ॥ २९॥

कामाक्षी तस्य देवी स्यात् सर्वकामफलप्रदा ।
सुरेश्वराख्य आचार्यस्तुङ्गभद्रेति तीर्थकम् ॥ ३०॥ var हस्तामलक
चैतन्याख्यो ब्रह्मचारी यजुर्वेदस्य पाठकः ।
अहं ब्रह्मास्मि तत्रैव महावाक्यं समीरितम् ॥ ३१॥

आन्ध्रद्रविडकर्णाटकेरलादिप्रभेदतः ।
शृङ्गेर्यधीना देशास्ते ह्यवाचीदिगवस्थिताः ॥ ३२॥

स्वरज्ञानरतो नित्यं स्वरवादी कवीश्वरः ।
संसारसागरासारहन्ताऽसौ हि सरस्वती ॥ ३३॥

विद्याभरेण सम्पूर्णः सर्वभारं परित्यजन् ।
दुःखभारं न जानाति भारती परिकीर्त्यते ॥ ३४॥

ज्ञानतत्त्वेन सम्पूर्णः पूर्णतत्त्वपदे स्थितः ।
परब्रह्मरतो नित्यं पुरीनामा स उच्यते ॥ ३५॥

भूरिशब्देन सौवर्ण्यं बार्यते येन जीविनाम् ।
सम्प्रदायो यतीनां च भूरिवारः स उच्यते ॥ ३६॥

चिन्मात्रं चैत्यरहितमनन्तमजरं शिवम् ।

यो जानाति स वै विद्वान् चैतन्यं तद्विधीयते ॥ ३७॥

महानुशासनम् ।
मर्यादैषा सुविज्ञेया चतुर्मठविधायिनी ।
तामेतां समुपाश्रित्य आचार्याः स्थापिताः क्रमात् ॥ ३८॥

आम्नायाः कथिता ह्येते यतीनाञ्च पृथक्-पृथक् ।
तैः सर्वैश्चतुराचार्यैर्नियोगेन यथाक्रमम् ॥ ३९॥

प्रयोक्तव्याः स्वधर्मेषु शासनीयास्ततोऽन्यथा ।
कुर्वन्तु एव सततमटनं धरणीतले ॥ ४०॥

विरुद्धाचरणप्राप्तावाचार्याणां समाज्ञया ।
लोकान् संशीलयन्त्वेव स्वधर्माप्रतिरोधतः ॥ ४१॥

स्व-स्वराष्ट्रप्रतिष्ठित्यै सञ्चारः सुविधीयताम् ।
मठे तु नियतो वास आचार्यस्य न युज्यते ॥ ४२॥

वर्णाश्रमसदाचारा अस्माभिर्ये प्रसाधिताः ।
रक्षणीयाः सदैवैते स्व-स्व भागे यथाविधि ॥ ४३॥

यतो विनष्टिर्महती धर्मस्यास्य प्रजायते ।
मान्द्यं सन्त्याज्यमेवात्र दाक्ष्यमेव समाश्रयेत् ॥ ४४॥

परस्परविभागे तु न प्रवेशः कदाचन ।
परस्परेण कर्तव्या ह्याचार्येण व्यवस्थितिः ॥ ४५॥

मर्यादाया विनाशेन लुप्येरन्नियमाः शुभाः ।
कलहाङ्गारसम्पत्तिरतस्तां परिवर्जयेत् ॥ ४६॥

परिव्राडार्यमर्यादो मामकीनां यथाविधि ।
चतुष्पीठाधिगां सत्तां प्रयुञ्ज्याच्च पृथक्-पृथक् ॥ ४७॥

शुचिर्जितेन्द्रियो वेद-वेदाङ्गादिविशारदः ।
योगज्ञः सर्वशास्त्राणां स मदास्थानमापुयात् ॥ ४८॥

उक्तलक्षणसम्पन्नः स्याच्चेन्मत्पीठभाग् भवेत् ।
अन्यथारूढपीठोऽपि निग्रहार्हो मनीषिणाम् ॥ ४९॥

नजातु मठमुच्छिन्द्यादधिकारिण्युपस्थिते ।
विघ्नानामपि बाहुल्यादेष धर्मः सनातनः ॥ ५०॥

अस्मत्पीठसमारूढः परिव्राडुक्तलक्षणः ।
अहमेवेति विज्ञेयो यस्य देव इति श्रुतेः ॥ ५१॥

एक एवाविषेच्यः स्यादन्ते लक्षणसम्मतः ।
तत्तत्पीठे क्रमेणैव न बहु युज्यते क्वचित् ॥ ५२॥

सुधन्वनः समौत्सुक्यनिवृत्यै धर्म-हेतवे ।
देवराजोपचारांश्च यथावदनुपालयेत् ॥ ५३॥

केवलं धर्ममुद्दिश्य विभवो ब्रह्मचेतसाम् ।
विहितश्चोपकाराय पद्मपत्रनयं व्रजेत् ॥ ५४॥

सुधन्वा हिमहाराजस्तथान्ये च नरेश्वराः ।
धर्मपारम्परीमेतां पालयन्तु निरन्तरम् ॥ ५५॥

चातुर्वर्ण्यं यथायोग्यं वाङ्मनः कायकर्मभिः ।
गुरोः पीठं समर्चेत विभागानुक्रमेण वै ॥ ५६॥

धरामालम्ब्य राजानः प्रजाभ्यः करभागिनः ।
कृताधिकारा आचार्या धर्मतस्तद्वदेव हि ॥ ५७॥

धर्मो मूलं मनुष्याणां स चाचार्यावलम्बनः ।
तस्मादाचार्यसुमणेः शासनं सर्वतोऽधिकम् ॥ ५८॥

तस्मात् सर्वप्रयत्नेन शासनं सर्वसम्मतम् ।
आचार्यस्य विशेषेण ह्यौदार्यभरभागिनः ॥ ५९॥

आचार्याक्षिप्त दण्डास्तु कृत्वा पापानि मानवाः ।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥ ६०॥

इत्येवं मनुरप्याह गौतमोऽपि विशेषतः ।
विशिष्टशिष्टाचारोऽपि मूलादेव प्रसिध्यति ॥ ६१॥

तानाचार्योपदेशांश्च राजदण्डांश्च पालयेत् ।
तस्मादाचार्यराजानावनवद्यौ न निन्दयेत् ॥ ६२॥

धर्मस्य पद्धतिर्ह्येषा जगतः स्थितिहेत्वे ।
सर्ववर्णाश्रमाणां हि यथाशास्त्रं विधीयते ॥ ६३॥

कृते विश्वगुरुर्ब्रह्मा त्रेतायामृषीसत्तमः ।

द्वापरे व्यास एव स्यात् कलावत्र भवाम्यहम् ॥ ६४॥

मठाश्चत्वार आचार्याचत्वारश्चधुरन्धराः ।
सम्प्रदायाश्च चत्वार एषा धर्मव्यवस्थितिः ॥ ६५॥

अथोर्ध्वं शेषा आम्नायाः विज्ञानैक विग्रहाः
पञ्चमस्तूर्ध्व आम्नायः सुमेरुमठ उच्यते ।
सम्प्रदायोऽस्य काशी स्यात् सत्यज्ञानाभिधे पदे ॥ ६६॥

कैलासः क्षेत्रमित्युक्तं देवताऽस्य निरञ्जनः ।
देवी माया तथाचार्य ईश्वरोऽस्य प्रकीर्तितः ॥ ६७॥

तीर्थं तु मानसं प्रोक्तं ब्रह्मतत्त्वावगाहि तत् ।
तत्र संयोगमात्रेण संन्यासं समुपाश्रयेत् ॥ ६८॥

सूक्ष्मवेदस्य वक्ता च तत्र धर्मं समाचरेत् ।
षष्ठ स्वात्माख्य आम्नायः परमात्मा मठो महान् ॥ ६९॥

सत्त्वतोषः सम्प्रदायः पदं योगमनुस्मरेत् ।
नभः सरोवरं क्षेत्रं परहंसोऽस्य देवता ॥ ७०॥

देवी स्यान्मानसी माया आचार्यश्चेतनाह्वयः ।
त्रिपुटीतीर्थमुत्कृष्टं सर्वपुण्यप्रदायकम् ॥ ७१॥

भव-पाशविनाशाय संन्यासं तत्र चाश्रयेत् ।
वेदान्तवाक्यवक्ता च तत्र धर्मं समाचरेत् ॥ ७२॥

सप्तमो निष्कलाम्नायः सहस्रार्कद्युतिर्मठः ।
सम्प्रदायोऽस्य सच्छिष्यः श्रीगुरोः पादुके पदे ॥ ७३॥

तत्रानुभूतिः क्षेत्रं स्याद् विश्वरूपोऽस्य देवता ।
देवी चिच्छक्तिनाम्नी हि आचार्यः सद्गुरुः स्मृतः ॥ ७४॥

सच्छास्त्रश्रवणं तीर्थं जरामृत्युविनाशकम् ।
पूर्णानन्दप्रसादेन संन्यासं तत्र चाश्रयेत् ॥ ७५॥

॥ इति श्रीमद्भगवत्पादस्वामि आद्यशङ्कराचार्यकृतः
श्रीमन्मठाम्नायमहानुशासनं सम्पूर्णम् ॥

Encoded and proofread by Ankur Nagpal (ankurnagpal108 at gmail.com)

*maThAmnAyamahAnushAsanam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*